ण्यपवयेईगापाफलस्यनि धूतरजः सावित्री तत्राभवदर्शनसंपदेषावृहे हिवा
ऋ नपुण्यसंग्रहैः इणापाङ्लेभाफलस्यासविजीश्रीयस्करी निर्देतरजाः। हतरजोगु
ण अत्रनिरस्तधूलिः रजोरेणोगुणेधूलौ। पागोपीतिशाश्वतः एषामवदूशन
स्यसंपत्संपत्तिः लाभश्चनियावन संपदादिक्रिणोभावाएवंनान वीनवलाहकायानि
मेवायाः दिवौमूर्तस्यसंवेधिन्याहष्टतल्पमुपमालंकारः अत्रमुत्कृष्टिवदनर्कि
नोपपत्रेसवदर्शनेसर्वथाकस्यचित श्रेयसानिदानमित्यर्थः वारिवहतीतिवलाह
का। पृषोदरादित्वात्साधुः ५ ॥ ॥

अयेति अयक्रतूनां क्रियाः अनुष्ठानानि कामान्दुहन्तीति कामदुघाः फलदा इत्यर्थः दुहेः
कप् घश्चेति कप्रत्ययः अतेवादेशश्च संप्रत्यधुना भूमिदेवाः ब्राह्मणाः द्विजाग्रजन्मभूदे
व विप्रब्राह्मणा इत्यमरः सम्यगाशिषाणामा: [illegible] ब्राह्मणाशिषा यफलिना इत्यर्थः
यघनः कारणान् त्वय्यागते सति त्वदागमनेन निमित्तेनेत्यर्थः। अस्मि अहमित्यर्थः अ
थ। अस्मात्त्वत्संदर्शनान्नवादेऽहमपीति गणव्याख्याने। दासेह नागसेन बन्धुचिन्तः प्रस्न
णा पादप्रहारादिनिस्र दरिद्रास्मि हृदये इति प्रयोगात्। आसंस्तेत्रासं सोरायावन्नासासैन्य

यज्ञक्रियाः कामदुघाः क्रतूनां सम्यगाशिषः संप्रति भूमिदेवाः आसंस्त्वनेऽस्मि
जगत्युत्तमानस्त्वय्यागतेयद्बहुमानपात्रम् ८ श्रियं विकर्षन्नपहर्त्त्यघानि श्रे
यः परिस्रौति तनोति कीर्तिम् संदर्शनं लोकगुरोरमोघं तवात्मयोनेरिव किं
न धत्ते ८

र्थः। अनिविधा वा [illegible] विकल्पादसमासः जगत्यत्र बहुमानपात्रे बहुयोग्यता मानने ज्ञानः
सकलसत्कर्मफलं मन्ये। त्वदागमने। येन मे जगत्मान्यतेतिसाव: ९ श्रियमिति। आ।
त्मयोनेर्ब्रह्मण इव लोकगुरोस्तवामोघं विफलं सदर्शनं। श्रियं विकर्षन्नाकर्षति। अघा
नि दुःखान्यपहन्ति अघो दुःखव्यसनेषु इत्यमरः। श्रेयः पुरुषार्थं परिस्रौति परिस्रवति। की
र्तिं वितनोति। किं बहुना किं न करोति। सर्वं करोतीत्यर्थः ८ ॥

ये

१२

ॐ श्यानदेति। हे भगवन् श्यानन्मस्तुखे। यथा स्वाविकरोहिमयन्नाविदावपि विषयेन निर्हृतेन मनि
नमर्थस्य नशाहृस्य स्वरूपेति समासः। मे वक्तस्त्वस्ते निधौ निर्हृतिस्त्वमेति। मदावनस्य
37 सम्प्रज्ञितस्नातिवियोगखेदान्यजवंधुविरहदुःखे। मडच्छुमतीवानुपरोधे नप्रीणानीवेर
स्त्वेत्यहो। एवंविधेऽपि निर्हृतिकारणेऽपीदावनिर्हृतिकथना हि शोषोक्तिः। नडुक्ते। नन्त्वामथ्या
मनिर्हृतिविशेषोक्तिर्निगद्यते इति ॥ निरास्पदमिति। प्रभ्रज्जनहलनेनिरास्पदे। वदाम
मनयोजनप्रश्नानिरास्पदत्वमर्थः। आस्पदं प्रतिष्ठायामिति निपातः। प्रश्नानवकाशे

श्यानन्मस्तुखोऽपि हिमयुतो मम नानिर्हृतनिर्वृतिमेति वत्सः सम्प्रज्ञितस्नाति
वियोगखेदे नस्त्रानिधो उच्छुमतीव वेतः ॥ निरास्पदे प्रभ्रज्जनहलेऽविम
स्नाखधीनेऽर्कमनिस्पृहाणाम् तथापि कल्याणमकरी गिरं ते मांश्योतन्म्
श्लोकान्तुखरीक

हेतमाहतिः स्पृहाणांयुष्माहृशामित्यर्थः। अस्मात्स्वधीनमायत्तेकि मनः। किंविदस्मत्तो
लभ्यमित्यर्थः। आधारत्वविवक्षायां सप्तमी। तथापि कल्याणकरी। अस्मदेनैकहेतुमि
त्यर्थः। निस्पृहमहत्त्वे पारार्थ्यादिति भावः। हन्तोहेत्वेत्यादिना दवृप्रत्यये। अनस्ते गिरं श्यो
तन्निकामो। स्वर्वं वाणस्यास्त्रीति मत्वर्थीयेनरमाणी। स्वनवक्तुमेव धारयस्त्यः। दुर्गत्वे
तुस्ताखड्गी मन्त्रम् स्वखोदित्यमरः। ततः श्रियप्रत्ययः। स्वखरीकरोनिस्याहरतीत्यर्थः।

इतीति इत्थमुक्तिविशेषस्य उक्तिवैचित्र्यवाक्ययान्तयोक्तवान् उदारसत्वेनामहाम
ना नरेन्द्रो द्वैपायनेन व्यासेन द्वीपमयनं यस्याने जन्मभूमिर्यस्य स द्वीपायनः स एव द्वै
पायनस्तेन प्रज्ञादिभ्य इति स्वार्थे अण् प्रत्ययः नापत्यार्थे नडादिभ्यः फक् तेषु च पाठ
द्वापितार्थतत्त्वा जयोपपन्नौ मनः समाधाय जयसिद्धिमवेते अर्थः इति वक्ष्यमाणप्रका
रमुदारामर्थवतीं गिरमभिदधे उक्तः इन्द्रादितो दप्रधाने कर्मणि लिट् प्रधानकर्मण्या
ख्येये मादीनां द्विकर्मणः अप्रधाने दुह्यादीनां ण्यन्ते कर्तुश्च कर्मण इति वचनात् ।

इत्युक्तवानुक्तिविशेषरम्यं मनः समाधाय जयोपपत्तौ । उदारचेता गिरमत्युदा
रां द्वैपायनेनाभिदधे नरेन्द्रः ॥१॥ जिगीषतां जन्मवतामलङ्घ्यां यशोवतस्तामुभय
त्र भूतिं ॥ अभ्यर्हिता बन्धुषु तुल्यरूपा वृत्तिर्विशेषेण तपोधनानां ॥ तथापि
निघ्नं नृप तावकीनैः प्रह्वीकृतं मे हृदयं गुणौघैः ॥

आसैनावत्स्वस्य माध्यस्थ्यं स्तोतुं युग्मेन परिहरति जिगीषतामिति श्लोकद्वयेन पातो
गुणवचनादिति ङीप् यतो वनेषु कीर्तिभूषणम् उभयत्रेहामुत्र च भूतिं श्रेयांसि वी
यतो संगृहीतमिकता विनीतेः मनेता क्त प्रत्ययः तन्मवतां शारीरेणां बन्धुविषये
तुल्यरूपा एकरूपैव वृत्तिर्व्यवहारो पूर्व्वहिता तु वृत्ता तपोधनानां तस्मात् दृशा विशेषेण
नियमेनाभ्यर्हिता ॥ तथापीति तथापि तत्त्वदृशामपि मे हे नृप तावकीनैः त्वदीयैः
गुणसमूहैः समदोहनतया स्वेन चेति स्वत्व प्रत्ययः तवकममकावेकवचने इति तवकादेशः

कि. टी.
38

गुणोवैः प्रहीणं त्वावर्णितंमे हृदयं निवृत्त दायतम् आर्थी नो निवृत्त आयतम् रस्य मरः।
ननु निस्पृहस्य कोयं पक्षपातस्तत्राह वीतेति वीतस्पृहाणां विरक्तानां मुक्तिभाजां मुमु
क्षूणां भवेती तिभव्याः साधवः भव्यगेयेत्यादिना कर्तरि निपातः तेषु पक्षपाताः स्ने
हाः भवेति ननु साधुत्वं महतो महता माध्यस्थ्यं भंगकर इति भावः १२ अथ तत्पस्यगुणाव
त्रां प्रकरयितुं धृतराष्ट्रस्य दुर्योधनमुद्धारयति सुतानिति सूनुं सुतस्य राज्ञो धृतराष्ट्रस्य ह
ताः न किमुतस्य राज्ञ एवेत्यर्थः गुणैः श्रीतिदानदाक्षिण्यादिभिः सुयोधनेनानीताः ना

वीतस्पृहाणामपि मुक्तिभाजां भवंति भव्येषु हि पक्षपाताः १२ सुतानुसूंय
किमुतस्य राज्ञः सुयोधनेनाव तत्त्वैरनीतः यद्यक्तवान्तः सतृष्याबलाद्वा।
मोहं विपक्षे विषयाभिलाषः १३ ॥

तिरक्तानां अतीताय एवेत्यर्थः कर्तरि क्तः अमुतनमगुणोवेच त्यागहेतुः युष्माकना।
स्तीत्यर्थः उपालंभेकारणमाह यदिति यः सप्तुतराज्ञो वोगुणान् तृष्यातिः कार।
णमेव त्यक्तवान् यदि वयं सतामुणोपिकाश्वत हि कथमस्यात्यानत्राह बलादि
ति विषयाभिलाषो भोगतृष्णा बलाद्वा लादेव न वासाहिक स्तोपमयोवेत्यथ्यपि सत्
स्वयेरिति विश्ववः मोहमविवेकं विपक्षे विषयाभिलाषात् तिरिक्तान कस्मिंयुष्मत्याग
हेतुरस्तीत्यर्थः अत्र कारणकार्यसमर्थनरूपोर्थांतरन्यासोलंकारः १३ ॥

गुप्तराजत्वस्मादवबुद्धनीतयप्राज्ञो हानिं सूचयति जहानिमिति एतेन धृतराष्ट्रमर्थसिद्धिः कथं न जहातु न जहाति वेत्यर्थः प्रेप्सानि समयं प्राप्तकाले हत्वा स्वेति प्राप्तकाले लोहत सहानिकालः प्राप्त इति भावः कुतो यः धृतराष्ट्रः संशयमंदेहाकर्णोदिभिर्निहते कर्णादीनुमें विगुणः सेदिव्यार्थविनीतत्वेनालेव नेत्यर्थः प्रकाशनेयं याव्ययोस्वेति हेयाप्येयामात्मने पदं निहते सिद्धिरिति स्थितयो विवादपदनिर्णीता तथाहि असाधुयोगाद्दुर्जनसंसर्गाः जयान्तरायाः जयविघातकाः किं च प्रमाथिनीनां प्रकृत्नलनशीलानां विपदां पदानि स्थानानि पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुष्वित्य

जहातनेनं कथमर्थसिद्धिः संशयकर्णादिभुविनिहते यः असाधुयोगा हि जयान्तरायाः प्रमाथिनीनां विपदां पदानि ॥१४॥ पटूयसा नामनितो विशुद्धां धर्मार्थ धानेन पुरे च विरायं नयाविपन्नस्य विपत्निरम्प्रमादि ... ॥१५॥ वि

मरः न केवलं जयविघातकाः किं तु नयं कारिणश्चेत्यर्थः

धृतराष्ट्रोपि दुर्जनविधेयत्वाद्विनेतत्यर्थः १४ एवं प्राज्ञोरनर्थमकथयित्वा राज्ञोर्थसिद्धिं सूचयति पटूयइति विशुद्धां समितो सभायां सभासमितिसंसदित्यर्थः पटूयनायां दुःशासनस्य स्त्रीग्रहणसाहसमंगीकृतवत्यामित्यर्थः विरायधर्मा धर्माद्धपेतो धर्मपथ्यार्थन्यायाद्यनपेत इति यत्ययः पुरेमादरधानेन कुलेमविधमारवालितेत्यर्थः नयाविपन्नस्यापि अविपन्ति अविनाशी अतएव रम्ये गुणोद्भूतानादिष विषयेपरग्मुकतं प्रेमावितन प्रकटीकृते दुःसहमपि सोढवतानयासाधु

कि. टी.

39

विधायेति । किं च शम एव एका मुख्या वृत्तिर्यस्य तस्य परोपतापिनः भवतः छलेन क
पटेन आत्मने हितम् आत्मनीनः स न भवतीत्यनात्मनीनः स्वस्यैवानर्थहेतुरित्यर्थः तमा
त्मविध्वंसनं भोगोत्रापहरणं वा इति स्वप्रत्ययः विध्वंसनं समयकार्यं विधाय कृत्वा प्रकाशि
तः प्रख्यापितः त्वन्मतिशीलयोः सारबलमहत्त्वं येषां सारः प्रकर्षो यैस्ते तथोक्तास्ते तव
विद्विषः कृतोपकारा इवोपकृतवन्त इव अपकारोऽप्युपकारायैव संवृत्तो येषामसौ
त्वमसमैत्राजस्त्वं च जगति सत्यमासीदिति भावः विद्यमानस्यापि सज्जनस्य चंदन
दाहणा इव गुणाः परिभवेणैव प्रवृत्तीं संवृत्तीति भावः ॥ १६ ॥ अथ प्रयोजनान्तरमाह स

विधाय विध्वंसनमात्मनीनं शमैकवृत्तेर्भवतश्छलेन प्रकाशितत्वन्मतिशी
लसाराः कृतोपकारा इव विद्विषस्ते ॥ १६ ॥ लभ्या धरित्री तव विक्रमेण ज्यायांश्च वी
र्यास्त्रबलैर्विपक्षः । अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतन्त्रा हि रणे जयश्रीः ॥ १७

नै

लभ्येति तव त्वयेत्यर्थः कृत्यानां कर्तरि वेति षष्ठी धरित्री विक्र
मेण लभ्या प्राप्यानवसलभा तद्धितेत्याह विपक्षस्य शत्रुरपि वीर्यं शौर्यं महा
णाश्रेयादीन् बलानि सैन्यानि तैर्ज्यायान् अभ्यासपत्ररोपिकतरः इति यावत् ज्या
वेति स्यादेशः अतः प्रकर्षाधिक्याय विधिरुपायो विधेयः कर्तव्यः कुतो हि रणे ज
यश्रीः प्रकर्षतन्त्रा प्रकर्षायत्ता इति यावत् तत्र प्रधाने सिद्धान्तस्त्वमरः बलिन एव ज
योन दुर्बलस्येति भावः ॥ १७ ॥

श्च यत्रिरित्यादि श्लोकद्वयेन विपक्षमाधवं वर्णयति त्रिरिति त्रिरिति त्रिः स
प्तान् समवायेन त्रिः सप्तकृत्वः एकविंशतिकृत्व इत्यर्थः त्रिः सप्तशब्दयोः अत
एव यत्कृत्वोपादानमपेक्षितं तदुक्तं काव्यप्रकाशे प्रक्रान्तविषयलक्षणं यत्कृत्वो
पादानेनापेक्षते इति जमदग्नेरपत्यं पुमान् जामदग्न्यः गर्गादिभ्यो यञिति यञ्
प्रत्ययः यस्य भीष्मस्य वीर्यावधूतो विक्रमोऽभिभूतः अविकास्तवयं वा इत्यर्थः तदा
संग्रामे सम ये गुणानां शौर्यादीनां प्रकर्षमतिशयमाधारवशमाश्रयाधीनम्
विवेक जानाति स्म विद्यायाः स्वशिष्याद्भीष्मात्तस्मादपि प्रकर्षाधानदर्शनादिति भावः

त्रिः सप्तकृत्वो जगतीपतीनां हन्ता गुरुर्यस्य स जामदग्न्यः । वीर्यावधूतः स्म
तदा विवेद प्रकर्षमाधारवशं गुणानाम् ॥ १८ ॥ अस्मिन्ननैश्वर्यकृतव्यलीकः
पराभवं प्राप्स्यति वा म कोऽपि । उत्त्वा पयः कस्य रणे न कुर्यान्मनो भवैकप्रवणेऽस्य

स्मेति पादद्वयं पादद्वयेन शृणुते इति भीष्मः १९

विवरः १८ यस्मिन्निति यस्मिन् भीष्मविषये नैश्वर्यस्याभावो नैश्वर्यं समसामर्थ्यं
न भूश्च वीर्यस्य तेन कृतं व्यलीकं विप्रियं नास्तीति विकल्पात्ततः शृङ्गं व्यस्याभावः
तेन कृतव्यलीकः न नितवैलक्ष्यः तुः एवैतत्वव्यलीकमिति यादवः अनेको
पि पराभवं प्राप्स्यति भीष्मस्य कामशरणे नाविति कोऽपि पराजित इत्यर्थः किन्तु तत्पर
तिभावः स भीष्मो रणे पयः ... त्वं पयसा मनो भयेऽप्रकप्रवणे एकान्तस्वशि
वम्भाववतत्समासः न कुर्यात् वेरणापि मनसि भयं कुर्यादेवेत्यर्थः १९ ॥

कि सज्जनमिति आजौ रणे इषुसंहतीर्बाणसंघातान् सज्जनं वर्षन्तं मेघेनमित्यर्थः कोपज्व
ये टी लितं कोपेन दीप्तं अतएव परिस्फुरंतो लोला याश्च शिखाग्राण्येव जिह्वा यस्यतं तथो
40 क्तं जगल्लोकं जिघत्संतं भक्षयितुमिच्छंतं अतएव संभ्रमाकुलत्वमयः लेढु मनो यस्मिन्निति यथा
देशाः अंतवह्निं कालाग्निमिवाश्रितं गुरुं इष्टानां वा गुप्ताकं मध्ये कः सहेत सोढुं कः
शक्नुयात् कोपीत्यर्थः शाकि लिङ् चेति शक्यार्थे लिङ् ॥ २८ ॥ निरीक्ष्येति संरंभेणावे को
वेन निरस्तं त्यक्तं धैर्यं निर्विकारत्वं येन तेन तथोक्तं आदीयनेन बधः येषां
ह्वानि त्यमित्यर्थः आराधितं जामदग्न्यं भृगुपुत्रेण भार्गवेण जामदग्न्यादप्यधिकतरं
सज्जनमाजाविषुसंहतीवः सहेत कोपज्वलितं गुरुं कः परिस्फुरल्लोलशिखा
ग्रजिह्वं जगज्जिघत्संतमिवांतवह्निम् २८ निरीक्ष्य संरंभनिरस्तधैर्यं राधे
यमाराधितजामदग्न्यम् असंस्तुतेषु प्रसभं भयेषु जायेत मृत्योरपि पक्ष पातः २९
स्वामिनिभावः राधेयं राधापुत्रं कर्णं भीष्मद्रोणादिकं निरीक्ष्य
अस्मोरक्षिसंस्तुतेष्वपरिचितेषु संस्तवः स्यात्परिचय इत्यमरः भयेषु प्रसभं प्रसह्य
पक्षपातः परिचयो जायेत भवेत मृत्योरपि अस्मादद्वितीयात् किंपुनरन्यस्येति भावः
संभावनायां लिङ् अत्र जनिक्रियायेनयासमानकर्तृत्वाभावः पक्षपातक्रियायाः
संभावानिरीक्ष्येति लिङ् निर्देशः समर्थनीयः प्रधानेनाप्रसंगेने भावस्येयो जनक र
नियोक्तृरिवेककारः अत्रभयमसंबंधरक्तिनस्सप्तमोभयमसंब धाभिधानीदसंबंधे
संबंधरूपातिशयोक्तिरलंकारः २९

अथास्यानेककरणीयमागमनप्रयोजनं युग्मेनाह । यथेत्यादि । यया विद्ययाकरणेन
सुदुश्चरामतिदुश्चरां तेन तपस्यां तपश्चर्यां कर्मणोऽसि मध्यनेयोऽभ्यावर्तिवैरोहितिकाय
श्रः तपस्याया इति क्रियायामप्रत्ययः आचरता पश्यति तपः कुर्वतेत्यर्थः सुलभं वसमासा
दितं प्रामसाधनेय प्रपत्तास्त्वरूपं येन तेन कपिकेतनेन केतनेवैदूर्यस्यानेनार्जुनेनैवे
त्यर्थः दुरापमन्यस्य दुर्लभं वीर्यं तेजः समवाप्यैते शत्रवो रक्षाः भौमादय उन्मूलिता रः ।
उन्मूलयिष्यन्ते उन्मूलयतेर्ण्यन्तात् कर्मणि लृट् अत्र चिह्नाविरहिङ्कागमेऽपि नस्यासिद्ध

यया समासादितसाधनेन सुदुश्चरामाचरतानपस्याम् एते दुरापं समवाप्य ।
वीर्यमुन्मूलिताः कपिकेतनेन २२ महत्वयोगाय महामहिम्नामाराधनीं तां
नृपदेवतानां दातुं प्रदानोचितभूरिधाम्नीमुपागताः सिद्धिमिवास्मि विद्याम्

वदत्राभावादिस्यसिद्धत्वात् णेरनिटीति णिलोपः वा तु २३ ।
सिद्धस्यैवानिटीति निषेधात् तदुक्तं विभुर्हडियुरुहेलेभ्येच दीर्घस्त्रोङ्कोयामिता
वाविणीति इह वासिद्धत्वेन मेन्नुप्यनेनिर्णिम्याय बलविमित्रोविद्यानीति २२ ।
महत्वेपिहेतु पमहत्वयोगाय प्रकर्षलाभाय महामहेभ्यो महानुभावानां देवतानामि
न्द्रादीनामाराध्यमानेनयेति आराधनीयां तां समादृताविद्यामित्यर्थः करणाधिकरणयो
श्चेति ल्युट् ङीप् भूरिधाम्नीं महाप्रभावां धामदेशे गृहे रश्मौ स्थाने जन्मप्रभावयोरि
ति विश्वः अनुपधालोपिनोऽन्यतरस्यामिति वा ङीप् तां विद्यामिहामेव रूपां सिद्धिम
साक्षात्कार्यसिद्धिमिवेति विद्यायाः श्रमावतोक्तिः प्रथानोचितदानपात्रभूत फलभोक्तृवादेरस्य

कि
वे टी
41

उतीति इन्द्रनीलवर्तमायमाणे प्रसेदिवासं प्रसन्ने भाषायां मरकतस्फवरशतिगुणः ते
गुर्विनिष्ठल्लनयनशीलोन्नेनः स्नाहित्रिचवगलुविति,तु प्रत्ययः अत्र साधयानिति त्वेवं
रूपं अजानतशत्रोः धर्मराजस्य स्वयमावि देषणशीलताहि यसंतताबाकोशमाणस्य त
दाहिहः सत्रिमर्थः अतेव मन्त्रिवबाचरच कञोते वासि तोशिष्यद्दसमरः विनयेनेनानो
दूतेनोपससार २४ निर्यायेति ग्रथवाद्धिकणावसानाग्रिस्कन्लिंगवडुन्तलादिवता
स्तानिध्यादितिभावः विगुदमंत्ररूपादिनादिरम्यात अक्षौनभास्करादर्वाय विंबादि
इन्द्रनीलवतेऽत्र न साधयेति प्रमालाय न्वाक्यमजातशत्रोः प्रसेदिवांसंतमुपा
ससादवमन्त्रिवांतेविनयेनजिष्णुः २४ निर्यायविद्यायादिनादिरस्याद्विम्बा
द्विवार्कस्य मनुजोन्महर्षेः पार्थानननेवद्धिकणावदानादीप्रिस्फुरन्त्यग्निमिवा
भिपेदे २४ योगंववतेयोग्यतमायतस्मैतपः प्रभावाद्दिततारमग्रः ॥ ।

वमहर्षेर्व्यासस्यमुखोन्निर्यायनिर्गत्यसमासेनत्र र्वाक्कालस्य दीप्तिरर्कदीधति
स्फुरद्वहिकसत्यग्रामिव पार्थानन मर्जुनस्य भुवनमभिपेदेप्रविष्टा २५ योगमिति योग्यु
तमायार्हमापित्तसौष्णयाय तेव समागम महिमाने योगध्यानविधिं व योगः संहृत नो
पाययध्याने संगतियुक्तिविषयमरः तपः प्रभावात् योवितनारादृष्टौ विरकालयाह्यम
पीतिभावः येनयोगेन तत्तेषु प्रकृतिमहदादि प्रकृति महानहंकारः मनः पञ्चतन्मा

पंचमहाभूतानीति चतुर्विंशतितत्त्वानि तेषु अवभासे साक्षात्कारे हेतुनेतसमस्तान्ने
नश्यवहूरादि विरायसन्निमीलेव नुन्मिषतमिवेत्नसेता कोपि महाननिर्वेलान्ता
नसज्जननलनावभासः विरागंधस्यहूहिलाभइवासाभवदितिभावः २६ आकारमि
ति आशासितभूरिलोभोनुनेकंश्रेयः यस्मिंस्तं तथोक्तं महाभाग्यसूचकमित्यर्थः
अंतःकरणाशाहेननानुरूपनिरूपणाहोलक्ष्यते तदनुरूपं तदनुकूलं उत्साहानुगुणत्वा
पारवत्वमित्यर्थः आकारमूर्तिं दधानं तमर्जुनं मुनिर्विजयोदये विजयफलके तपः

येनास्यतत्त्वेषु कृतेवभासे समुन्मिमीलेव विरागवृत्तः २६ आकारमाशंसि
तभूरिलाभं दधानमंतःकरणानुरूपं नियोजयिष्यन्विजयोदये तं तपःसमा
धौ मुनिरित्युवाच २७ अनेन योगेन विवृद्धतेजा निजां परस्मै पदवीमयच्छन् स
माचराचारमुपात्तशस्त्रो जपोपवासाभिषवैर्मुनीनाम् २८ ॥

समाधौतपोनियमे समाधिर्नियमेध्याने जिनेवैवसमर्थने इति विश्वः : या
नियोजयिष्यन्नियोजयितुमिच्छन्नित्यर्थः लृट्शेषेचेति लृटलृटः सद्वेति सत्प्रत्ययः
इतिवक्ष्यमाणमुवाच २७ अनेनेति अनेनसोपादिष्टेन मयोक्तेनेत्यर्थः योगेनोपा
येन विवृद्धतेजाः निजां पदवीं परस्मै अयच्छन् परस्य प्रवेशमयच्छन्नित्यर्थः उपात्त
शस्त्रोगृहीतायुधएवसन् जपोपवासाभिषवैः स्नानाध्ययनशनस्नानैर्मुनीनामाचा
रमनुष्ठानं समाचरानुतिष्ठ २८ ॥

कि॰ टी॰ 42

तेऽत्र विधेयो ऽनेन पासि इति विस्मापाय येन तन्निर्देशं नाह । करिष्यसे इति यत्र शिलोच्चये गोत्र भिदः इन्द्रस्य प्रमदाय प्रसादाय सुदुष्कराणि तपांसि करिष्यसे चारुशिलोच्चये रम्ये शिखरे तं शिलोच्चयं गिरिं इन्द्रकीलसंज्ञं अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चया इत्यमरः । नामधेयो गुह्यकोऽयं तस्य तेऽनेन मेवाश्वः प्रादुर्भावादेव इति निर्देशः । तपसा प्रयासेनेत्यर्थः । नेष्यति प्रापयिष्यति २९ इतीति इतीत्युक्त्वा हेन्द्रसूनुमर्जुनं ब्रुवाणे नाकवतेत्यर्थः । वर्तमानसामीप्ये भूतेवर्तमानवत्प्रत्ययः । तिरोधानस्यावलंबनस्य नार्थः । तेन महर्षिणा व्यासेन तिरोबभूवे तदेव भावे लिट् । राजन् राजोयत्स्वराजः राजा ।

करिष्यसे यत्र सुदुष्कराणि प्रसत्तये गोत्रभिदस्तपांसि । शिलोच्चयं चारु
शिलोच्चयं तमेष गन्ता नेष्यति गुह्यकस्त्वाम् २९ इति ब्रुवाणेन महेन्द्रसू
नुं महर्षिणा तेन तिरोबभूवे । स राजराजानुचरोऽस्य साक्षात् प्रदेशमादेशमिवा
धितस्थौ ३० ॥ कृतानतिर्व्याहृतसांत्ववादे जातस्पृहः पुण्यजनः [illegible] [illegible]सजिवौ

प्रभो नृपेवं देयत्नेनत्रियराजयोरिति विग्रहः । तस्यानुचरोऽशर्वीको यक्षोऽनु [illegible] ॥ सृतेनादेशः साक्षान्मूर्त्यानमिव सशरीरमिवेत्यर्थः नाधिष्ठितं प्रदेशमधितस्थौ मासमित्यर्थः स्यादित्यभ्यासेन वाप्यासमयोजिषतं ३० कृतेति सपुण्यजनो यक्षः कृतानतिः कृत प्रणामः सन् व्याहृतसांत्ववादे इत्यप्रियवचने व्याहृते उक्ते लपितं भाषितमित्यमरः । जिष्णा वर्जुने जातस्पृहो जातानुरागः सन् सख्यौ सहदरीव ग्रथामित्रसंख्याहृत् इत्यमरः ॥

चारु

संप्रसादे विश्रंभं विश्वासमिति यावत् उदयाय प्राप तथा हि सतां साधूनां योगः सं
गतिः शश्वत् तत्क्षणमेव विश्वासयति विश्वासं जनयति हि सामान्येन विशेषणेन सा
मर्थ्यं न रूपोऽर्थो नयमासः १९ अथेति अथोऽस्तमासात्सूर्येणोदयाय पुनरुद्गमाय वि
हीयमानौ ह्यानमानाविति नमः अभिमुकारणोक्तिः उरुद्युतीन् सौवर्णेनाटीव्य
मानाविमर्थः इति नमः सः संकोचनकारणोक्तिः सुमेरुशृङ्गानिव अथ यस्मे रुद्र
हणेर्त्रैकानां सौवर्णो घोषनाथे तेनार्जुनेनोदयाय अथ मेर्वेहीयमानान् उरुद्

उदयाय सख्याविव संप्रसादं विश्वासयन्त्या शुभसतां हि योगः १८ अथोऽस्तभा
सेव सुमेरुशृङ्गानि विहीयमानानुदयाय तेन उरुद्युतीन् दुःखेन कान्तिलाभेन २६
मः पान्नैषां तु सुतनाशमेये २२ अप संध्याया लोहितकार्यन्तः श्रेष्ठास्समानीय विभ
ज्यमानः तस्या हि भागादिव तन्मनोभिर्दुःखाय तिमात्रो पिलनः समेते २३ ॥
॥

द्युतीन् अनेकवृद्धिप्रकाशान् पूर्वं वा हि शोषणाद् उदयस्य प्रयोजनेन म
तेनैमं धेयम् पांडुसुतानां युधिष्ठिरादीन् वनवासे विशेषः दुःखेन कालकृतः ।
उत्पादितः आत्मलोभ उत्पन्ने दुर्योधनस्य तयोः तेषां विवेकिनां कथं विलम्बो दधमिन
र्थः नमः शोकोऽधकारस्य नमोऽधकारे स्वभीतो नमः शोकेन पूर्णो तेषां तस्मिन्नपि यच्चापि पि वि
ष्वः पान्नैमं दप्रपेटे तेषां विवेकिनाडीनमीत निवृत्तिभावः अथ नमः शत्रुस्याश्मि
एतान् श्लेषाद् उपालितनेयमुपमा २४ आशंसयेति अप संध्याय नभसि दिग्ध्वमे यथा तथा

कि
द्वेरी
43

नोचितकार्येण मिमोक्षितकार्येण तत्र: विस्मृत: इति लघुमहे त्वाक्तिः कुरुविदोदे पाञ्चा
ङ्गी भ्रातुस्तत स्यामिति निधानतं कार्यमौरवमालोच्येत्यर्थः तथापि प्रेम्णा भ्रातृवात्सल्य
तकर्त्रा समानीय पुनराकृष्य विभज्यमानः समशो भागी क्रियमाणः तस्य प्रेम्णा तस्य दु:
खं तं भवतीति भावः सपूर्वोक्तो दुःखमेवातिसारो दुःखातिसारोपि इति भारभूतमति
दुःखमित्यर्थः तमनोभिः तेषां वनगर्णापार्था नामनोभिः तस्याद्विभागादिव पूर्वोक्ता
त्मिमकतास मसागण द्विवेत्यर्थः वस्तुतस्त्वविवेकादेवेति भावः पुनर्विभागग्रहणं।
तस्य हेतत्वोक्तेनार्थे अत्रवाल्पत्तिदोषः लघुमेने मतः यथैकेनैकधा विभज्य वक्तुमि
धैर्येण विश्वास्यतया महर्षेस्तीव्रादरातिप्रभवाच्च मन्योः वीर्यं च विद्वत्सु
सुते मघोनः स तेषु न स्थानमवाप शोकः ३५ ॥
तद्यमानो महानपि भारो लघुमन्यते तद्वदित्यर्थः यत्र यथैवं प्रेम्णाकृष्यमाणमपि
शोकं विवेको निर्निगेनाह धैर्येणेति धैर्येण तेषां निसर्गतो निर्विकारचित्ततेन तथा
महर्षेर्व्यासस्य पूर्वनेकस्येति शेषः विश्वास्यतया श्रद्धेयवचनतेनेत्यर्थः अरणप्रभवा
दरातिहेतुकात्तीव्रादसह्यान्मन्योः क्रोधाद्धेतोः तथार्जुन प्रभावपरिज्ञानाच्चेति हेतेन
दैविवेषणमुखेनाह मघोनः सुते तेनेवीर्यं च तलोके स्यादिना पष्ठी प्रतिषेधः विद्व
त्सु ज्ञानवत्सु विदेः शतुर्वसुरिति वैकल्पिकोवस्वादेशः तेषु पार्थेषु स शोकः स्था
नास्थितिं नमाप ३४ ॥

तानिति तायार्थोल्लिङ्गवत् धर्मस्वरवे धर्मधान्ति स्वरोनिवेत्यमरः तद्विकद्ध।
मधार्मद्वद्वे नक्लितिनासममासः भृश्यिधाग्रलेजाक्षिनः इतिहेमल्कैः चतरला।
मार्याव वामरस्यभृतिधाग्रः वतरोयामाग्रहृता निवहंविहाय एकोघशतमेकरा
णिभूतेसत एणपादयः कलादिमिविमर्थे कर्मधारयः एणपादे राकतिगणार
निषाकरायनः कलाविनावरी कलापवतांविधानमिव कलोडोपदीग्रपटे
२५ नुषारेति साट्टोपदीविलोकनेन्नेनावलोकने ग्रहृफभाव ग्रहृफामिया
तान्भूरिदीग्रः वतरोपिहृरंदेहाययामानिववामरस एकौघभूतंतदधार्म
कलांविभावरीहृतमिवाससाद २५ नषारकेणाङ्कलितोत्पलाभेपर्यस्त।
लीमगलभंगभीरुः ग्रहृफभावापिविलोकनेसानलोचनेमेलयितंविषहे
यापि स्फरामिलाषोपीतियावत् भावोली … २६ ॥
लाक्रियावेष्टा भूत्वमिघायजेनलिप्समरः मंगलभंगभीरु मंगलहानेभीतामती
पर्यस्ताणी पतितनास्फके वाष्पाहतेश्वर्थः अतएवनषारलेषाङ्कलितोत्पला
मे हेमबिंदुसहिते इंदीवरसंनिभे ग्रस्तपमालंकारः लोचनेमीलयितंनविषहे
नशशाक ग्रश्रुणोहप्यावरकत्वेपितस्यापानस्यामगलतानन्निवर्तकंमीलि
नसानवकारत्यर्थः २६ ग्रहृफविमेति श्रद्धस्त्रजनेनःक्रियायानिहनःकविमः

कि.
वैटी
44

द्विनः त्रिरिति त्रिः त्रेर्मा ग्रित्वमिति मम्प्रतयः प्रेमैव रसो हृन्द्विमेण प्रेमरसेनाभिरा
मे अन्यत्र प्रेमरसेन मधुरा दिनावाभिरामे रामयोरमणेणापिते हृष्टिविलोभयतीति
दृष्टिविभोधि दृष्टिप्रियमित्यर्थः दृष्टदर्शनेन तुमकेभ्यो वेत्रः मनः प्रसादः प्रस
न्नमनस्त्वमर्थः सोऽलिविवेश्वयमित समासः तेन मनः प्रसादांजलिना पर्युत्सायुषा
ग्रेयशैवलमिव पथ्यातिथिस्वपतेर्दम निकाममतिशायेन जयाय हरामार्पितपा।
र्थेयं तेमायभवतीमागमः २० धैर्येति वसाद्विपेन वनगजेन वमथु हरणमुवेकु
लनेयोननार्थे निदाघसिंधुः ग्रीष्मनदीव निदाघयहणं दोर्बल्ययोननार्थे धैर्या
प्रहृन्द्रिमप्रेमरसाभिरामेरामार्पितेदृष्टिविलोभिहत्तम मनःप्रसादंज
लिनानिकामंजयाय्हृपाथेयमिवेदमत्तुः २० धैर्यावसादेन हृतोपसादा
वमाद्विपेनेवनिदाघसिंधुः निरुद्धबाष्पोदयसन्नकण्ठमुवाच हृच्छ्कादिति
राजपुत्री २८ ॥

वसादेन धैर्यप्रशेन कर्ज्ञाहृतपसादा हृतनैर्मल्यासोमंगामितस्ववराजपुत्री स
त्रियस्वनाद्रौपदी अतः स्वाचयुक्तमेव वक्ष्यतीति भावः निरुद्धबाष्पोदयं निरुद्धो
दनं सन्नकंठं हीनस्वरं अप्यनयोः कृतवकृत्वीयोः क्रियाविशेषणयोर्विशेषण
समासः कृच्छ्रात्कष्टे विदं तिवक्ष्यमाणमुवाच २८ ॥

मग्नामिति वेकशूते पंकोपमिते भूतं स्मादौ पिशाचादौ स्यायेसत्योपमानयोरिति
विषयः द्विषः कत्यनिशात्रुकपटे मग्नाउरुहुरामितिभावः संभावनोयोग्यानांगौर
वमिति यावत् भूतिसंपदमिव भूतिभेस्मानिंसंपदीत्यमरः गुरुरिष्यत्तुद्वारकस्त्वमिति
शेषः आधिद्विषाउः तोकिंदोनपसामाप्रसिद्धः सम्यक् सिद्धिपर्यंतमस्मद्विनास्मा
भिर्विनेत्यर्थः इत्यार्जिनेमादिना विकल्पात्सेवमी भूयोमा उन्मनीभूः अस्माद्वि
रहादुर्मनामाभूरित्यर्थः दुर्मनस्त्वनपः परिपन्थितादिति भावः मादीमापौरस्थल

मग्नांद्विषस्कत्यनिपंकभूते संभावनोभूतिमिवोद्धरिष्यन् आधिद्विषामानपसो
प्रसिद्धेरस्मद्विनामाभूयामुन्मनीभूः ११ यशोधिगंतुं सुखलिप्सया वा मनुष्य
संख्यामतिवर्तितुं वा निरुत्सुकानामभियोगभाजाम् समुत्सुकेवांकमुपैति
सिद्धिः ५० ॥

इन मादृ योगस्थिति अराणामविषयः अनुत्सुकानुत्सुकानाः संपद्यमानः उन्मनी अभू
तेनद्रावैस्त्रि अस्मर्मनस्मत्तस्येनोरत्नसामलोपश्चेति सकारलोपः अस्यत्त्वाविनो
वारः ११ अथानौत्सुक्यादापन्नोर्थेनपसामवोर्थसिद्धिनिदानतमाह यशइति
यशोधिगंतुं कीर्तिलब्धुं सुखलिप्सया लब्धुमिच्छया वा मनुसंख्या मनुष्यगण
नामतिवर्तितुमतिक्रमितुं वा अमानुषंकर्मकर्तुमेवेत्यर्थः अभियोगभाजामभि
निवेशवतां अनुत्सुकानामउर्मनायमानानामेवेत्यर्थः सिद्धिरुत्कर्षः यशः स्वबोधयशी

कैवल्यमुपैति नमस्कारस्माद्विरुद्धः तेनाप्तः सिद्धः सो
ऽहमस्मीति भावः ५

कि अथास्य मनस्विहृदीपनद्वारेण तपःप्रभृतिप्रथायितमहिमविकारं नावश्यं तत्प्रिंरुह्यारयति
चेटी लोकमिति विधात्रा ब्रह्मणा लोकं गते विहितस्य सप्तस्वस्यतत्त्रियजातेः संवर्धितः यः
45 पालेजेयः। तदेवमेवं जेतृशास्त्रानुनेता मन्त्रादित्यक्षेति स्वार्थे प्यप्रत्ययः ओजो बले।
दीप्तिर्वा उजो बलेवदीप्तौ चेति विश्वः तदेव वसुदनमिति रूपकालंकारः मुष्णन्नप
हरन् अविभिः कृतनिकारस्यः कृतः तां तेजश्यतिभावः किं च विजये कहनो वैजये

लोकं विधात्रा विहितस्य गोप्तुं क्षत्रस्य मुष्णन् वसु जैत्रमोजः तेजस्वितायाः
विजयैकवृत्तेर्निघ्नं प्रियं प्राणमिवाभिमानम् ५१ ॥

कजीविताया तत्त्रियस्य विजितव्यमिति स्वगुणादिति भावः हन्तिवं तनजीविनो
पायश्चस्य मरः तेजस्विनामित्यर्थः तेजसः प्राधान्यद्योतनार्थं भावप्रधानो निर्देशः
प्रियं प्राणमिव प्राणसममित्यर्थः अभिमानमहंकारं निघ्नन् खेडयन् तेजस्वि
नो प्राणहानि श्रायो मानहानि रिति भावः ५१ ॥

शुचिङ्गिपाद्यमहत्तेजः प्रणामयतोपि न माद्यमिति भावः व्रीडेति पुनश्चाश्रमज
नेनोपनीतः स्थापितः प्रापितश्चेत्यर्थः तथापि पौरस्त्या संभावितवृद्धेति भावः व्रीडा
नतैः नतु धृषितहन्तान्तश्रवणादिति भावः नृपैः दैशान्तरैश्चैः कण्ठेणप्रपन्नाश्रोङ्गीकृता
कथंचिदिदिश्वस्तश्चेत्यर्थः भूपालानामपि दुःसहः किमुतान्यभवतामिति भावः द्वशा।
यां वृत्तैर्विष्वाख्याख्योः अन्यथा व्याख्यायते आश्रमजनोपनीता जातिकृतः संपाद्यक
थमिदमनाप्यपूर्वस्यमिति भिवार्थं व्रीडामते नतु धृषितकर्मदर्शनादिति भावः न
पैस्तवैः कण्ठेणप्रपन्नोऽगीकृतः योगकलत्रेषु मध्यमस्य सुदामित्वमिति द्यो

व्रीडानतैराश्रमजनोपनीतासंभाव्यकस्रगेणनृपैः प्रपन्नः विताननभूतं विततं।
पृथिव्यां यशः समूहन्निव दिग्विकीर्णम् ५२ ॥

योतितश्चेत्यर्थः यत्तद्योरपि यथाश्रमजनोपनीततत्पदार्थभूतस्य विशेषणा
गम्याद्धेतुतोक्त्या काव्यलिंगमलंकारः इत्यर्थो विताननभूते उल्लोचोपमिते यद्वा
विताननभूते विताननसमे उल्लोच तत्प्रमितियावत् अस्मीविताननमुल्लोचश्चेत्यम
रः पृष्ठे स्मादावृत्ते भूतेषाणपतीकसमेत विस्तृत सम्पन्नः दिगविकीर्णं विताननमपि दिग्गं
तलग्नमिति भावः विततं प्रथितं यशः समूहं संकोचयन्निवोच्यस्ता अरातिपरिभूतस्य
ऊतः कीर्तिरिति भावः ५२ ॥

कि वीर्येति पुनस्त्ववीर्यावदानेषु कृतावमर्शः कृतास्कन्दनः पराकृतपराक्रमा
ये टी द्भुतान्यपि प्रशस्तान्यभिप्रायर्थः अवदानं कर्मवृत्तमित्यमरः अनपवसंप्रतीतिं प्रख्यातिं प्रती
46 तेप्राथितनयोनावित्तविज्ञानविश्रुतास्त्यमरः अभूतामविद्यमानामिवेति अतोप्यसत्तशु
ष्वेष्यते तनवन्कुर्वन् पुनस्त्वाह्नः अवशेषोदिनांतोर्कत्विषामिवायतीनामुत्तरकालानां
प्रयामः क्षयंदैर्घ्यनाशंकुर्वन्निति शरीरेयमुपमा अतिनिराकृतस्यकृतमित्रायत्ययान
मितिभावः ४३ प्रसह्येति पुनः परैः शत्रुभिरस्मासुप्रसह्यप्रयुक्तः आवतितोयोनिका

वीर्यावदानेषु कृताभिमर्षस्तन्वन्नभूतामिव संप्रतीतिं कुर्वन्प्रयामक्षतिमा।
यतीनामर्कत्विषामह्न इवावशेषः ४३ प्रसह्य योस्मासु परैः प्रयुक्तोवक्तुंन
शक्यः किमुताधिगन्तुम् नवीकरिष्यत्युपशुष्यदार्द्रः सत्वद्विना मे हृदयं निका

रः परिभवः केशांबराकर्षणरूपः स्मर्तुं न शक्यः अधिकर्तुमनुभवितुं किं रः ४४
पुनः यस्य स्मरणमपि दुःसहमनुभवस्तु दुःसह इति किमु वक्तव्यमित्यर्थः स निकारस्त्व
द्विना त्वया विना पृथग्विनेत्यादिना पंचमी आर्द्रः सन् कृतस्थिरभिभूतानां शरणप्रहार
इव त्वद्विरहदुःखोपशुष्यन् नवी भविष्यतीत्यर्थः उपशुष्यन् नवयापि शुष्कमिति भावः दुः
खग्रंथं शुष्कपदार्थः मे हृदयं नवीकरिष्यति आर्द्रीकरिष्यति व्रणमिवेति भावः दुःखि
तस्य पुनर्दुःखोपचयः प्रयोजनमायमपि दुःखं तत्हेतुं प्रकृतद्धारयतीत्यर्थः अत्र श्लोकादिवि
शेषणसामर्थ्याद्व्रणोपप्रस्तुताद्य प्रतीतेः समासोक्तिरलंकारः ४४ ॥

पुनः प्रकारांतरेणाप्यनुपपत्तिं दर्शयति प्राप्त इत्यादिभिः श्लोकैस्त्रिभिः त्वंच वत्समाप्तेणा
प्रत्यभिज्ञानहेतुभिर्दुर्जनत्वं विशिनष्टि अभिमानस्य व्यसनात् भ्रंशात् व्यसनेविप
क्षिप्ते शेषकामजकोपजव्यसनैः दंतव्यसनाद्दंतभंगाद्दंतीवासह्यं विकारं वैरूप्य
मासः अतोनप्रत्यभिज्ञायसे इति भावः एवमुत्तरयोरप्युन्नेयं पुनश्च द्विषत्प्रतापेनाभि
न्तरितं तिरस्कृतमुरुतेजः प्रतापोयस्य स तथोक्तः अतएव शरद्घनाकीर्णः शरन्मेघ
कलुषोह्नः आदिः प्रत्यूष इवास्थितः नहि देवाप्रत्यभिज्ञायमान इत्यर्थः मध्याह्नमेघा

प्राप्तोभिमानव्यसनादसह्यं दंतीव दंतव्यसनाद्विकारम् । द्विषत्प्रतापान्तरितोरु
तेजाः शरद्घनाकीर्ण इवादिरह्नः ४५ सव्रीडमंदैरिव निष्क्रियत्वान्नात्यर्थमस्त्रै
रवभासमानः यशःक्षयात्क्षीणजलार्णवाभस्त्वमन्यमाकारमिवाभिपन्नः ४६
दुःशासनामर्षरजोविकीर्णैरेभिर्विनाथैरिव भाग्यनाथैः केशैः कदर्थीकृतवी र्य

सारोपि कथं विद्यप्रत्यभिज्ञायते एवं प्रायेणोक्तमार्थसारः कच्चित्स एवाभिधनंजय
स्त्वमिति ४५ सव्रीडेति पुनश्च निष्क्रियत्वादर्थक्रियाक्षमत्वात्सव्रीडमंदैरिव मंदैरपटु
भिरिवाश्रितैरस्त्रैर्लज्जा मृणालापटुनिर्भाग्या मंदा इत्यमरः अस्त्रैरत्यर्थं नावभासमा
नोनप्रकाशमानः पूर्ववन्नैवासीति भावः किंच यशःक्षयाद्धेतोः क्षीणजलोयोर्णवस्तद्वा
भस्तत्सदृशः त्वमन्यमाकारमभिपन्नः प्राप्त इव स्थित इत्यर्थः तस्मात्क्षीणजला
र्णवाभत्वमुपमासमासोहि ४६ दुःशासनेति पुनश्च दुःशासनेन परिकर्तितरमर्षः आकर्षण

कि ये टी

47

सएव रजो धूलिः मालिन्यहेतुत्वादिति भावः तेन विकीर्णे विनिहिते तत एव विनाशे श्वाश्रिततवनाम सत्त्वायतनादनाशे विश्वाश्रिते विनश्यत्ता अथवा कथमिव दुर्दर्शोति भावः किंतु भाग्यनाशे दैवमात्रशरणे रम्यथा सद्रूपमपि लुप्येतेति भावः एभिः परिहृष्यमानैर्वर्ण्यमितेति भावः केशाः शिरोरुहैः कुत्सितेन वल्कलकदर्थः अर्थोभिधेयकैरेव सत्त्वप्रयोजननिरन्तिर्ह्रियमाणः कोकन्दमूलकषवेति अथवा रूपरूपकदादेश्याः कदर्थीकृतोऽगहार्थीकतो वीर्यसारौ शौर्यबले यस्य सततयोः कः इत्थं इत्थं विलक्षणं सएव इत्थं रूपं पवधन्वजा। योभिकांक्षित कविकाममयवेदनश्यामरः सएव वेत्ति वस्त्रमात्मतपेत्तमस्य इति भावः ४७।

क्षत्त्रियस्त्राणसहः सतो यस्तत्कार्मुकं कर्मसु यस्य शक्तिः ॥

अथाप्युपेत्यायोद्योगमाह सहति ततात्रायत इति तत्रैव क्षत्रियस्तु उर्जोऽस्तु पीति योगविभागात्कप्रत्ययः पृषोदरादित्वात्सर्वपदस्याम लोपः अथवा क्षतात्त्रायत इति क्विबन्तोपपदात्कप्रत्ययः क्षत्त्रे जातः क्षत्त्रियः क्षत्राद्घ इति घप्रत्ययः कर्मणे प्रभवतीति कार्मुकं कर्मण उकञ् इत्युकञ्प्रत्ययः एवं स्थिते वाक्यार्थः कथ्यते यः सतां साधूनां सहनः इति सहः पवाग्रत्राणस्य सहः त्राणसहः रक्षणक्षमः सएव क्षत्त्रियः क्षत्त्रियशब्दवाच्यः ॥

तथा यस्य कार्मं स्वरणो क्रियास्य शक्तिरस्तीति शेषः तदेव कार्मुकं कार्मुकशब्दवाच्यं अन्यैवैतौ शाङ्गमन्यौ नामानेत्यर्थः एवं स्थिते द्वयी द्विधा मुक्तिर्द्वाविमौ तत्रैव कार्मुक शाङ्गावित्यर्थः अफलेऽर्थे वीनावयवार्थशून्ये ऽर्थजाते स्वाभिधेयसामान्यजातमात्रेत्यर्थः जातं जात्यपेक्षत्वमात्रस्थिति विषयः वहन्नुवर्तयन् असंस्कारहृतामसत्प्रयुक्तिरूपितां विकरोतीत्यस्यैतत् तस्मात्त्वमप्यस्मत्प्रस्तावेनोक्तदोषाद्यात्मानं मोचयस्वेत्यर्थः ॥१८ अयत्नकृतेन अपि तोजीवेषु विस्माहु वीतौजाति द्वेयार्थं वीतौजसः निधिमात्रे स्वनिधिमा

वहन्द्वयमप्यफलेर्थजाते करोत्यसत्कारहतामिवोक्तिम् ॥१८ वीतौजसः
सन्निधिमात्रशेषा भवत्कृतां भूतिमिवेक्षमाणाः सामान्यदुःखा इव नस्त्वदी
याः सरूपतां पार्थ गुणा भजन्ते ॥१९ ग्लानिं विक्षिप्यमाणो विगुणैः प्रसादात्त्रातो दिवा
लयं सदा स्वर्गे ऽन्याम् ॥

शेषाः सन्निधिमात्रावशिष्टाः भवत्कृतां भवता करिष्य
माणां आशंसायां भूतवच्चेति भूतवत्प्रत्ययः भूतिमभ्युदयमवेक्षमाणास्त्वदीयाः गु
णाः समानदुःखा इव समदुःखभाज इव नो ऽस्माकं सरूपतां वीतौजसादिसाधर्म्यम
नेनैव स्वरूपमात्रासाव समानदुःखा इवेत्युत्प्रेक्षा तया वीतौज इत्यादि सम्भाविकयात्र प्राणितेत्य
तनुसंधेयं ॥१९ तथापि ममैवं कोऽयं भावः प्रस्तुत आह ग्लानिं विक्षिप्यमाणमिति प्रमादात्प्रमा
द्वानितात्तत्तदौर्बल्यादिति भावः विगुणैरविक्षिप्यमाणमपि विक्षिप्यमाणं मन्तव्यं प्रमादा
त्रागैः प्रत्रागाद्विगतानागात् इति वैजयन्ती ग्लानिं समस्तमावहितं मनके सरम् तरा सराकेस

कि
यं टी
48

मृगेंद्रमिवदारुणेते त्वामिति ४९ः कार्यभावः तिग्मरश्मिं दीप्यमानदिनमणिमिव योगपतयानिर्वाह
कतयेत्यर्थः अधिरूढाधिरूढवती कर्मेतिरिक्तः तदधीनेतिभावः ५० पूर्वानिव्यवसाय
स्य सत्त्वविषयत्वादिनोदाहरणेः संप्रति व्यवसायिनो गुणमाह करोतीति ५०ः पूर्व।
न शोषजनादितरजनादतिरिक्तामधिकां संभावनां यशः पायिनीमित्यर्थः संभावनायोग्यतां
क्रियाभिस्वरितैरर्थवतीं सफलां करोति तेषु मासे सत्त्वसमासु समासमिति संसद
त्सु सभासु गुरुषाधिकारे योग्य गुरुषाधिकारे योग्य गुरुषगणनावसरावेजातेसति पूर्व
तेनेनेति शरणीसंख्या द्वित्रादिसंख्यानसमुपैति अद्वितीयोभवतीत्यर्थः तस्मादस्या
त्वो पूर्वियोगपतयाधिरूढादीप्यमानदिनमणिरिवद्युमेरयमीम ५० करोतियस्येव
जनातिरिक्तां संभावनामर्थवतीं क्रियाभिः संसत्सु जाते गुरुषाधिकारे न पूरणी
तेसमुपैति संख्या ५१ प्रियेषु येपार्थविनोपपन्नैर्विचिन्त्यमानैः क्रममेति चेतः
तवाप्रयातस्य जयाय तेषां क्रियादलानां मघवाविघातं ५२ ॥
साधारणलाभावात्तयाधिमहान् त्वामाह आश्रयेय इतिभावः ५१ अथ प्रस्तुतमतस्य सहल
भावि पतत्त्वस्य विजयप्राप्तिस्य कर्तव्यमुपदिशति प्रियेष्विति हे पार्थ प्रियेषु मसात्वं विष
येषु उपपन्नैः कारणाद्विनैव विचिन्त्यमानैः कस्मादेवाशंक्यमानैस्तैरर्थैश्चेतः क्रमेत्वेदमे
ति जयाय प्रयातस्य तव संबंधिनां तेषां मधनाना व्यवसानां तु दृश्यैतो व्यसनेषु घावैतवती
मघवाइंद्रः योगमाभिसपाल्यतइति भावः विघातं निवारणं क्रियात्करोतु आशिषि लि
ङ् लोटा विधायशीरर्थेलिङ् तस्मादस्मात्त्विनयाचेतो नखेदितव्यं जयार्थिना तव यां मया

[illegible]
किराता॥ ५२

मा गाः इति असंबाधो संकटे इति विज्ञेनः इत्यर्थः संकटेनानुसंबाध इत्यमरः शिवो निर्बा
धः द्वयोरन्यतरस्य विशेषणत्वविवक्षायां विशेषणसमासः तस्मिन्नसंबाधशिवेऽपि देशे
चिरायैकस्यासौ वस्थेवैकचरः एकाकी वसन् प्रमादं दोषं त्वं मा गाः इण्गतौ लुङि इति
गादेशः ननु निस्पृहस्य मम का किं विकारः प्रमाद इति वाच्यमित्याह मात्सर्येति मत्सर एव
मात्सर्यं द्वेषः रागः स्नेहः ताभ्यामुपहृतात्मनो रागद्वेषदूषितस्वभावानां मानसानि मनांसि
साधुवृत्तेष्वपि सत्सु स्खलंतीति विकुर्वते इत्युत्प्रमादनिषेधत्वाद्वा प्रमादस्वरूपकारणस्यानर्थप्रा
प्तिरूपकारणस्य व्यतिरेकेण कारणसमर्थनाद्धेतुधर्म्येण कार्यकारणसमर्थनाद्धेतुधर्म्येणाका

रागा

मा गाः स्थिरायैकचरं प्रमादं वसन्नसंबाधशिवेऽपि देशे। मात्सर्यमोहोपहृतात्मनो
हि स्खलंति साधुष्वपि मानसानि ५३ तदाशु कुर्वन्वचनं महर्षेः मनोरथान्नः स
फलीकुरुष्व प्रत्यागतेनास्मि कृतार्थमेवं भुजोपपीडं परिरब्धुकामा ५४ ॥

र्थकारणसमर्थनाद्धेतुधर्म्येण कार्यकारणसमर्थनरूपोर्थान्तरन्यासोऽलंकारः ५३ निग
मयेति तत्तस्मात्कारणादाशु महर्षेर्वचनं कुर्वन् तपस्यन्नित्यर्थः नोऽस्माकं मनोरथान् सफली
कुरुष्व वैविनिर्यातनेनोत्कण्ठाप्रतिष्ठापयेत्यर्थः प्रार्थनायां लोट् किं च कृतं त्वं प्रत्याग
तमिव वा त्वामौत्कण्ठितीर्यायायाः इतिवादेशाः स्तनयोरुपपीड्य स्तनोपपीडं सम्यग्वोप
पीडरुहकर्षद्रुणामुल परिलब्धुं कामो यस्याः सा परिरब्धुकामास्मि आलिंगनकामि
त्यर्थः तु काममनसोः परितिमकारलोपः प्राककार्यसिद्धेः एवं त्वत्सकाशादालिंगनमपि मन्यप्रीति
दर्शितमिति भावः ५४

कि॰ टी॰
49

उदीरितामिति सोऽर्जुनस्ततोऽङ्कं यज्ञसेनस्यापत्येनाऽस्त्रिया याज्ञसेन्या द्रौपद्या उदीरितामु
क्तां नवीकृतः पुनरुद्घाटनेन तथा प्रत्यर्पितः अत एवोद्ग्राहितो मनसि निधापितस्था
विप्रकारः परिभवो यया तां वाचमासाद्याकर्ण्येत्यर्थः उदीचीं काष्ठां दिशं दिशस्तु
ककुभः काष्ठा आशाश्च हरितश्च ता इत्यमरः आसाद्य तिग्मरश्मिरिव भृशं दिदीपे जज्वा
ल चक्रोधेत्यर्थः ५१ अथेति अथ विद्विषः शत्रून् पुरः पश्यन्निवास्थितः तथा पुरोधसा

उदीरितां तामिति याज्ञसेन्या नवीकृतोद्ग्राहितविप्रकाराम् आसाद्य वाचं
स भृशं दिदीपे काष्ठामुदीचीमिव तिग्मरश्मिः ५५ अथाभिपश्यन्निव विद्वि
षः पुरः पुरोधसारोपितहेतिसंहतिः बभार सौम्योऽपि वपुः स भीषणं गतः ।
क्रियां मन्त्र इवाभिचारिकीम् ५६ ॥

धौम्येनारोपिता समन्त्रमाहिता हेतिसंहतिरायुधकलापो यस्य स तथोक्तः हेतिर्ज्वाला
कुरायुधयोरिति वैजयन्ती सोऽर्जुनो रम्यः सौम्यः सन्नपि अभिचारः परहिंसा तत्प्रयोजनमस्या ।
अभिचारिकी प्रयोजनमिति ठक् तां क्रियां गतः अभिचारकर्मणि नियुक्त इत्यर्थः मन्त्र
इवारम्यः प्रकृत्या रमणीयः सन्नपि भीषयत इति भीषणं तथा दिनादित्युप्रत्ययः वपुर्ब
भार प्रयोगे मन्त्रप्रयोगादिभेदादिव सौम्यस्याभेदात् भीषणो बभूवेत्यर्थः ५६ ॥

उक्तमायुधयोर्ग्रहणं विहायैवंरूपस्यागमनमाह ॥ अविलेत्यादिभिः परैः शत्रुभिरविलंघ्यमन
तिक्रमणीयं विकर्षणं यस्य तत् अगम्याकर्षणमित्यर्थः किंच प्रथितो ज्यारवो गुणध्वनिः क
र्मैव बाणमोक्षादिकं यस्य तत्कार्मुकं चोद्वहन्नित्यर्थः तथारीणां दृष्टिगोचरं दृष्टिपथमगतौ
ऽग्रहवेषु निवर्तितादर्शनादिति भावः निर्गतास्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशाः खड्गाः डच्प्रत्ययः संख्याया
स्तत्पुरुषस्योपसंख्यानात्समासान्तः तेन निशितेन निस्त्रिंशेन युक्तः इति शितनिस्त्रिंशयुजौ स
न्नद्धेत्यादिना द्विवचनं महेषुधी महान्तौ निषंगौ च इषवो धीयन्तेऽनयोरिति विग्रहः कर्मण्यधि
करणे चेति किप्रत्ययः तूणोपासंगतूणीरनिषंगा इषुधिर्द्वयोः इत्यमरः खड्गे तु निस्त्रिंशच

अविलंघ्यविकर्षणं परैः प्रथितज्यारवकर्म कार्मुकं अगतावरिदृष्टिगोचरं शित
निस्त्रिंशयुजौ महेषुधी ॥ ५७ यशसामेव तिरोदधन्मुहुर्महसा गोत्रभिदायुधपत्नीः
कवचं च सरत्नमुद्वहन्ज्वलितज्योतिरिवांतरं दिवः ५८ ॥

न्द्रहासासिरिष्टयः इत्यमरः ५७ यशसेति किंच गोत्रभिद इन्द्रस्यायुधपत्नीर्वज्रप्रहारव्रणानि
तेऽत्र वनदाहसंभवादिति भावः महसा स्वकान्त्या यशसेव मूर्तया कीर्त्येव मुहुस्तिरोदधत्त्रासा
दयन् सरत्नं रत्नसहितं अत एव ज्वलितज्योतिर्दीप्ततारकं ज्योतिस्ताराग्निभानादिकं य
त्राथाध्यरात्मा स्थिति वैजयन्ती दिवोऽन्तरं नभोमध्यमिव स्थितं अन्तरं परिधानीयं बाह्ये त्वीयं
नराम्भसि क्लीबेऽन्तमध्यप्रकाशाश्चेति वैजयन्ती कवचं चोद्वहन् ५८ ॥

कि ३ टी

५०

आलिङ्गेति सोऽर्जुनः अलकाधिपभृत्येन यक्षेण दर्शितमतः शिवं निर्बाधमुर्वीधरवर्त्म हिम
वन्मार्गं प्रति संप्रयान् गच्छन् उद्बाष्पाः तपोभृतां उद्बाष्पदृशां वियोगदुःखेन साश्रुनेत्राणां तपो
भृतां द्वैतवनवासिनां तपस्विनां हृदयानि समाविवेश चिन्तयामासेत्यर्थः ५९ अथ जयति
ति अथ आशाः दिशः दिवि भवं दिव्यं दिग्गजादिप्रभवं यत्किंचित् तत्स्वनयः दुन्दुभिध्वानमनुजगुरनु
रुर्ध्वनुः गायन्ते स्म लिट् व्योम्नि सुरकुसुमनिपातैः लक्ष्मीर्वितेने शुशुभे पुष्पवृष्टिरासीदित्यर्थः किं
चातिस्फुरन्ती वेला वेलायां कूले या वीचयस्ता एव बाहवो यस्य सः तथोक्तः वेलाकूलवीचिबा
हुः पयोधिः विकासान्वितः पयोधिः स्फुरन्ती उल्लसन्ती हर्षाद्विस्पन्दमानां वसुधां प्रियामिव भाराव

अलकाधिपभृत्यदर्शितं शिवमुर्वीधरवर्त्म संप्रयान् हृदयानि समाविवेश सक्षणमु
द्बाष्पदृशां तपोभृताम् ५९ अथ जयाय नु मेरुर्दिव्यं दुन्दुभिध्वानमाशाः सुरकुसुमनिपातैः
व्योम्नि लक्ष्मीर्वितेने प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्ती भुवमनिभृतवेलावी
चिबाहुः पयोधिः ६०

तारणरूपं कथयिष्यन्निव कथयितुमिवेत्यर्थः लृट् शेषे चेति च
काराक्रियायां लृट् आलिलिङ्ग सर्वे देवं कार्यं कृतवानित्येव इति भावः अत्र विशेषेण
सामान्यतादवस्थ्यानुगम्यतोत्प्रेक्षा सा किल लंकारः अत्र च प्रस्तुतयोः भूमीसमुद्रयोः प्र
तीयमानान्यनायकाभ्यां भेदे सुप्रेऽस्तनि तेन निशायोक्तिवशात् आलिङ्गनोक्तिरिति रहस्यमे
वमतिशयोक्तिः अत्र प्राणिनाम् समासोक्तिः प्रियकथनांशे पुनीवयं तिष्ठन्ते गभावेऽभ्
न इत्युभयोरङ्गाङ्गिभावेन संकर इति विवेचनीयं ६० इति श्रीपदवाक्यप्रमाणपारावार
पारीण महोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां

किरातार्जुनीये महाकाव्ये तृतीयः सर्गः ३

तीयः सर्गः ३